Asish Kumar Mukherjee
21.9.99.

ADDENDUM

# ADVAITAVEDANTASAMMATAM JIVANMUKTISWARUPAM

THESIS SUBMITTED FOR THE DEGREE OF
DOCTOR OF PHILOSOPHY ( ARTS )
OF THE
UNIVERSITY CALCUTTA
1998

ASISH KUMAR MUKHOPADHYAY
DEPARTMENT OF SANSKRIT
UNIVERSITY OF CALCUTTA
CALCUTTA

अत्र प्रबन्धे जीवन्मुक्तेः स्वरूपनिरूपणमद्वैतवेदान्तमतानुसारेण निरूपितम् । अद्वैतवेदान्तिनां जीवन्मुक्तिस्वरूपप्रतिपादनरीतिः सुविदिता, सुप्रतिष्ठिता च । जीवन्मुक्तिर्न केवलमद्वैतवेदान्तिभिः स्वीक्रियते, अपितु अन्यैरपि भारतीयदार्शनिकैरनेकैः स्वीक्रियते । केवलं रामानुजोऽन्येच द्वैतवेदान्तिनः जीवन्मुक्तिं नाभ्युपगच्छन्ति । तेषां मतमपि सुप्रतिष्ठितमेव । ते वदन्ति वेदान्तवाक्यार्थज्ञान-मात्राद्बन्धनिवृत्तिर्नोपपद्यते । यद्यपि बन्धो मिथ्यारूपो ज्ञानबाध्य एवेत्युच्यते, तथापि तस्यापरोक्षत्वान्न वाक्यार्थज्ञानेन निवृत्तिर्भवितुमर्हति । वाक्यजन्यज्ञानस्य परोक्षरूपत्वात् परोक्षज्ञानेन चापरोक्षस्य बन्धस्य निवृत्त्यनुपपत्तिरेव भवेत् । न च वाक्यादपरोक्षज्ञानमुत्पद्यते । अपरोक्षज्ञानं विना अपरोक्षस्य बन्धस्य निवृत्त्यसम्भवात् । अद्वैतवादिसम्मतं वाक्यजन्यज्ञानस्यापरोक्षत्वं तैर्नाङ्गीक्रियते । एतन्मतेऽविद्याया अनिर्वचनीयायाः स्वीकार एव श्रुतियुक्तिविरोधः । सुतरामविद्यानिवृत्तिरसिद्धा । यथा रज्ज्वा परोक्षज्ञानेन रज्जौ अपरोक्षरूपस्य सर्पज्ञानस्य निवृत्तिर्नभवति, किन्तु रज्जुरेषा न सर्पः इत्यपरोक्षज्ञानेनैव तादृशस्यापरोक्षसर्पज्ञानस्य निवृत्तिर्भवति, तथा प्रकृतस्थलेऽपि बोध्यव्यम् । अतएव, अद्वैतिनां जीवन्मुक्तेः स्वीकारः श्रुतियुक्तिबहिर्भूतः, कल्पित एव ।

किञ्च, जीवन्मुक्तिपदार्थस्य विचारे उच्यते -- शरीरवतो मुक्तिरेव जीवन्मुक्तिरिति । तच्च व्याहतम् । शरीरसम्बन्धो वर्त्तते, अथच मुक्तिरपि वर्त्तत इति व्याहतमेव । यथा वन्ध्या पुत्रवती - इति विरुद्धं भवति, तथा प्रकृतेऽपि । न केवलं प्रत्यक्षेण, अपि तु शास्त्रेणापि जीवन्मुक्तिरपाक्रियते । तथा हि श्रुतिः -- "मर्त्यं वा इदं शरीरम्, आत्तं मृत्युना, तदस्यामृतस्याशरीरस्यात्मनोऽधिष्ठानम् । आत्तो वै सशरीरः प्रियाप्रियाभ्यां न वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्ति, अशरीरं वावसन्तं न प्रियाप्रिये स्पृशतः ।" -- इत्यादि ।[1] एवं प्रकारेण द्वैतवेदान्तिभिर्जीवन्मुक्तिस्वरूपं निराक्रियते ।

किन्तु, अत्राहं मन्ये तेषामित्थं जीवन्मुक्तिस्वरूपनिराकरणं युक्तिविरुद्धमेव । तथाहि, अद्वैतवेदान्तिसम्मतं ब्रह्म तैर्नाङ्गीक्रियते । अद्वैतवेदान्तसम्मतं ब्रह्म निराकारं निर्विशेषं चिन्मात्रस्वरूपम् । एतादृशं ब्रह्मस्वरूपं तैर्नाङ्गीक्रियते । अद्वैतवेदान्तिसम्मताऽनिर्वचनीयाऽविद्याऽपि तैर्नाङ्गीक्रियते । तादृशब्रह्मज्ञानेन तादृश्या अविद्याया निर्वृत्तेरपि तैर्नाभ्युपगता । अतएव जीवन्मुक्तिस्वरूपनिरूपणे तेषां प्रत्यवस्थानं न सम्मतं मन्ये ।

---

१. छान्दोग्योपनिषद् - ८/१२/१

ब्रह्म यदि निर्विशेषं निराकारं चिन्मात्रस्वरूपं स्वीकृतं स्यात्, दृश्यमानस्य द्वैतस्योपपत्त्यै यदि अनिर्वचनीयाविद्याऽभ्युपगम्या भवेत्, तदा तादृशब्रह्मज्ञानेनाविद्यानिवृत्तिः स्वीकार्या एव ।

किन्तु तादृशज्ञानेन यदि अविद्यानिवृत्तिः स्यात्तदा ज्ञानानन्तरक्षण एव मुक्तिर्भवेत् । तथा सति ब्रह्मज्ञानोपदेशपरम्परा न सिध्येत् । ज्ञानमात्रादेव सद्यमुक्तौ ब्रह्मज्ञानवतः शरीरनाशाद्ब्रह्मज्ञानं लोकानां कथं भवेदित्युपदेशः कथं स्यात्, केन वा क्रियत इति ।

अतएव, ब्रह्मज्ञानवतः सद्य एव शरीरनाशो न सङ्गतमिति स्वीकार्यम् । अतएव, ब्रह्मज्ञानवतोऽपि शरीरं शरीरसम्बन्धो वा तिष्ठत्येवेति स्वीकार्यमेव । सैव च जीवन्मुक्तिरित्युच्यते ।

जीवन्मुक्तिस्वीकारं विना ब्रह्मज्ञानोपदेशपरम्परा नोपपद्यत इति ।

प्रकृतोपयोगी यथामति प्रदर्शितम् । शास्त्राणामाचार्यवचसाञ्चानुशीलनेन यत्किञ्चिन्मनसि उदितं तदपि प्रसङ्गतस्तत्तदाचार्यमतविवरणसमये यथामति समुपन्यस्तम् ।

यद्यपि शास्त्राण्यनन्तानि, युक्तयश्च सीमाहीनाः, आचार्याणामुपदेशाश्चापरिमिताः, सर्वेषां पर्यालोचनं मितेन समयेन, मितेन च वचसा नोपन्यासार्हमिति विरम्यते ।

प्रबन्धादौ भगवति प्रणामनिवेदनेन मङ्गलाचरणं कृतम् । प्रबन्धान्तेऽपि भगवति नमस्कारनिवेदनेन मङ्गलाचरणं कृत्वा विरम्यते ।

नवनीलाम्बुदरुचिरं चरणरणत् किङ्किणीजालम् ।
हैयङ्गवीनचोरं नन्दकिशोरं नमस्याम: ।।

# निबन्धे समुद्धृतानां ग्रन्थानां परिचयः

| ग्रन्थः | ग्रन्थकारः | प्रकाशना / सम्पादना |
|---|---|---|
| अमृतबिन्दूपनिषद् | - | निर्णयसागर मुद्रणालय |
| अष्टावक्रसंहिता | अष्टावक्रमुनि | वसुमती साहित्यमन्दिर |
| अनुभूतिप्रकाशः | विद्यारण्य मुनीश्वरः | चौखम्बा |
| अद्वैतानुभूतिः | शङ्कराचार्य्यः | कमार्सियाल गेजेट प्रेस् |
| अद्वैतदीपिका | नृसिंहाश्रमः | चौखम्बा |
| अद्वैतरत्नरक्षणम् | मधुसूदनसरस्वती | निर्णयसागरमुद्रणालय |
| अद्वैतसिद्धिः | मधुसूदन सरस्वती | निर्णयसागरमुद्रणालय |
| आयुर्वेदः | वैद्यक | रामप्रसाद शर्मा- लाहौर |
| इष्टसिद्धिः | विमुक्तात्मन् | वरदागाइकोयाड़ |
| ईशोपनिषद् | - | वाणीविलास |
| उपदेशसाहस्री | शङ्कराचार्यः | चौखम्बा - वाराणसी |
| ऋक्वेद् | - | मोक्षमुलर |
| ऐतरेयोपनिषद् | - | आनन्दाश्रम |

| ग्रन्थः | ग्रन्थकारः | प्रकाशना / सम्पादना |
|---|---|---|
| कठोपनिषद् | - | विवेकानन्दमठ |
| कठोपनिषद् | - | आनन्दाश्रम |
| कठोपनिषद् | - | वाणीविलास |
| कणादसूत्रम् | कणादः | चौखम्बा - वाराणसी |
| कल्पतरुः | अमलानन्दः | निर्णयसागर मुद्रणालय |
| कल्पतरुपरिमल | अप्पयदीक्षित | निर्णयसागर मुद्रणालय |
| कालाग्निरुद्रोपनिषद् | - | वाणीविलास |
| किरणावली | उदयनाचार्यः | एशियाटिक् सोसाइटि |
| केनोपनिषद् | - | चौखम्बा - वाराणसी |
| केनोपनिषद् | - | वाणीविलास |
| केनोपनिषद् | - | आनन्दाश्रम |
| कौषीतक्युपनिषद् | - | वाणीविलास |
| गूढार्थदीपिका | मधुसूदन सरस्वती | नवभारतपाबलिशार्स |
| चर्पटपञ्जरिकास्तोत्रम् | शङ्कराचार्यः | वसुमतीसाहित्य मन्दिर |
| चाणक्यसूत्रम् | चाणक्यः | |

| ग्रन्थ: | ग्रन्थकार: | प्रकाशना / सम्पादना |
|---|---|---|
| चित्सुखी | चित्सुखाचार्य्य: | चौखम्वा |
| छान्दोग्योपनिषद् | - | वसुमतीसाहित्यमन्दिर |
| छान्दोग्यभाष्यम् | शङ्कराचार्य: | वसुमतीसाहित्यमन्दिर |
| जीवन्मुक्तिविवेक | विद्यारण्यमुनि: | आनन्दाश्रम |
| जैमिनिसूत्रम् | महर्षि जैमिनि | चौखम्वा |
| तर्कसंग्रह: | अन्नंभट्ट: | पण्डितसूर्यनारायणशुक्ल-महोदयेन सम्पादित: ( चौखम्वा ) |
| तर्कसंग्रहचन्द्रिका | श्रीमुकुन्दशर्मा | निर्णयसागर मुद्रणालय |
| तर्कसंग्रह-अध्यापना | ड: नारायणचन्द्र गोस्वामी | संस्कृतपुस्तक भाण्डार |
| तलवकारोपनिषद् | - | वाणीविलास |
| तन्त्रवार्त्तिकम् | कुमारिलभट्ट: | चौखम्वा |
| तत्त्वप्रदीपिका ( चित्सुखी ) | चित्सुखाचार्य: | काशी उदासीन संस्कृत विद्यालय |
| न्यायकन्दली | श्रीधराचार्य्य: | चौखम्वा |
| नृसिंह उत्तरतापिनी उपनिषद् | - | वाणीविलास |
| न्यायकुसुमाञ्जलि | उदयनाचार्य्य: | काशीसंस्कृत सिरिज |

| ग्रन्थ: | ग्रन्थकार: | प्रकाशना / सम्पादना |
|---|---|---|
| न्यायदर्शनम् | महर्षिगौतम: | कलिकातासंस्कृत सिरिज |
| न्यायपरिचय | महामहोपाध्याय फणिभूषण तर्कवागीश | पश्चिमवङ्ग राज्य पुस्तक पर्षद |
| नैषधचरितम् | श्रीहर्ष: | हरिदाससिद्धान्तवागीश |
| नैष्कर्म्यसिद्धि: | सुरेश्वराचार्य्य: | चौखम्वा |
| पञ्चदशी | विद्यारण्य मुनीश्वर | नटवर चक्रवर्त्ती |
| पञ्चपादिका | पद्मपादाचार्य्य | माद्राजगभर्नमेण्ट ओरियेण्टाल सिरिज |
| पञ्चपादिका विवरणम् | प्रकाशात्मयति | ,, ,, ,, |
| परमार्थतत्त्वनिरूपणम् | कालीप्रसन्नविद्यारत्न ( संशोधितम् ) | शरच्चन्द्रशील एण्ड सन्स ( कलिकाता ) |
| पाणिनि सूत्रम् | पाणिनि | चौखम्वा |
| प्रश्नोपनिषद् | - | वाणीविलास |
| प्रशस्तपादभाष्यम् | प्रशस्तपादाचार्य: | चौखम्वा |
| भाष्यरत्नप्रभा | श्रीरामानन्दसरस्वती | स्वामीविवेकानन्दशताब्दी-जयन्तीप्रकाशन |
| वेदान्तकल्पलतिका | मधुसूदन सरस्वती | भाण्डारकर ओरियेण्टाल रिसार्च इन्स्टिट्युट् |

| ग्रन्थः | ग्रन्थकारः | प्रकाशना / सम्पादना |
|---|---|---|
| वेदान्तसार | सदानन्द योगीन्द्र | दि सेण्टाल बुक एजेन्सी ( कलिकाता ) |
| वेदान्तसिद्धान्तमुक्तावली | प्रकाशानन्द | जीवनानन्दविद्यासागर-कर्तृक सङ्कलिता |
| वेदान्तपरिभाषा | श्रीमद् धर्मराजाध्वरीन्द्र | चौखम्वा |
| वृहदारण्यकोपनिषद् | - | आनन्दाश्रम संस्कृत ग्रन्थावली |
| वृहदारण्यकभाष्यम् | शङ्कराचार्य्यः | आनन्दाश्रम संस्कृत ग्रन्थावली |
| वृहदारण्यकभाष्य-वार्त्तिकम् | सुरेश्वराचार्य्यः | आनन्दाश्रम संस्कृत ग्रन्थावली |
| ब्रह्मविन्दूपनिषद् | - | वाणीविलास |
| ब्रह्मसिद्धिः | मण्डनमिश्रः | माद्राजगभर्नमेण्ट ओरियेण्टाल सिरिज |
| ब्रह्मसूत्र | वादरायण | पाण्डुरङ्ग जवजी - मुम्वाई |
| वेदान्तदर्शनम् | | निर्णयसागर मुद्रणालय |
| ब्रह्मसूत्रशाङ्करभाष्यम् | शङ्कराचार्य्यः | पाण्डुरङ्गजवजी - मुम्वाई |
| ब्रह्मवैवर्त्तपुराणम् | व्यासदेवः | वसुमती साहित्य मन्दिर |
| वैयासिकन्यायमाला | श्रीभारतीतीर्थः | स्वामीविवेकानन्दशताब्दी-जयन्ती प्रकाशन |

| ग्रन्थः | ग्रन्थकारः | प्रकाशना / सम्पादना |
|---|---|---|
| वैयासिकन्यायमालाविस्तरः | विद्यारण्यमुनीश्वरः | चौखम्वा |
| वैशेषिकदर्शनम् | कणादः | एशियाटिक सोसाइटि |
| बौद्धदर्शनम् | गौतमः | साहित्यश्री - कलिकाता |
| भामती | वाचस्पतिमिश्रः | वसुमती साहित्य मन्दिर |
| भाष्योत्कर्षटीका ( श्रीमद्भगवद्गीतायाः ) | धनपतिसुरी | निर्णयसागर मुद्रणालय |
| भाषापरिच्छेदः | विश्वनाथ न्यायपञ्चानन | श्रीमत्पञ्चानन भट्टाचार्य-शास्त्रिणा सम्पादितः |
| मनुसंहिता | मनुः | निर्णयसागरमुद्रणालय |
| मनीषापञ्चक | शाङ्कराचार्यः | ,, ,, ,, |
| महाभारतम् | महर्षि व्यासः | गोरखपुर |
| महाभारतम् | महर्षि व्यासः | हरिदाससिद्धान्तवागीश-कर्तृक सम्पादितम् |
| मानमेयोदयः | नारायणः | माद्राज गभर्नमेण्ट ओरियेण्टाल सिरिज |
| माण्डूक्यकारिका | गौड़पादः | वाणीविलाससंस्कृत ग्रन्थमाला |
| माण्डूक्योपनिषद् | - | ,, ,, ,, |
| मुक्तिकोपनिषद् | - | ,, ,, ,, |

| ग्रन्थ: | ग्रन्थकार: | प्रकाशना / सम्पादना |
| --- | --- | --- |
| मीमांसाश्लोकवार्त्तिक | कुमारिलभट्ट: | चौखम्वा |
| मुण्डकोपनिषद् | - | वाणीविलास संस्कृत ग्रन्थमाला |
| मोहमुद्गर | शङ्कराचार्य्य: | वसुमती साहित्य मन्दिर |
| याज्ञवल्क्य संहिता | याज्ञवल्क्य: | चौखम्वा |
| युक्तिदीपिका | अज्ञातकर्तृक | एशियाटिक् सोसाइटि |
| योगसूत्रम् | पतञ्जलि: | चौखम्वा |
| योगवासिष्ठसार | वसिष्ठ: | निर्णयसागरमुद्रणालय |
| रामायणम् | वाल्मीकि | कलिकाता संस्कृत सिरिज् |
| वाक्यपदीय: | भर्तृहरि: | चौखम्वा |
| वार्त्तिकसूत्रम् | कात्यायन: | निर्णयसागरमुद्रणालय |
| विवरणप्रमेयसंग्रह: | विद्यारण्य: | वसुमती साहित्य मन्दिर |
| विवरणभाव प्रकाशिका | नृसिंहाश्रम | चौखम्वा |
| हितोपदेश | विष्णुशर्मा | पश्चिमवङ्ग मध्यशिक्षापर्षद् |
| शावरभाष्यम् | शवरस्वामी | चौखम्वा |
| शास्त्रदीपिका | पार्थसारथि | निर्णयसागरमुद्रणालय |

| ग्रन्थः | ग्रन्थकारः | प्रकाशना / सम्पादना |
|---|---|---|
| श्रीमद्भागवतम् | महर्षि व्यासः | गोरखपुर |
| श्रीमद्भगवद्गीता | महर्षि व्यासः | निर्णयसागरमुद्रणालय |
| ,, | ,, ,, | गीता प्रेस |
| ,, | ,, ,, | नवभारतपावलिशार्स |
| ,, | ,, ,, | उद्बोधन कार्यालय |
| श्रीभाष्यम् | रामानुजाचार्यः | चौखम्वा |
| श्वेताश्वतरोपनिषद् | - | वाणीविलास |
| सप्तपदार्थी | शिवादित्यः | चौखम्वा |
| सर्वदर्शनसंग्रहः | सायणमाधवः | दि भाण्डारकर ओरियेण्टाल रिसार्च इन्स्टिट्युट् |
| सर्वदर्शनसंग्रहः | सायणमाधवः | साहित्यश्री |
| सिद्धान्तलेशसंग्रहः | अप्पयदीक्षित | विद्याविलास प्रेस (वाराणसी) |
| सिद्धान्तविन्दुः | मधुसूदन सरस्वती | क्षेत्रपालघोष (कलिकाता) प्रकाशकः |
| संक्षेपशारीरकः | सर्वज्ञात्ममुनिः | चौखम्वा |
| सांख्यदर्शनम् | महर्षिकपिलः | नटवरचक्रवर्त्तिना मुद्रितम् प्रकाशितञ्च |

| ग्रन्थ: | ग्रन्थकार: | प्रकाशना / सम्पादना |
|---|---|---|
| सांख्यप्रवचनभाष्यम् | श्रीविज्ञानभिक्षुः | भारतीयविद्याप्रकाशकः |
| सञ्चयिता ( कड़ि ओ कोमल ) | रवीन्द्रनाथ ठाकुर | विश्वभारती |

**सहायका: ग्रन्था:**

| | | |
|---|---|---|
| वेदान्तदर्शनम् | ( सम्पादकौ- स्वामी चिद्घनानन्दपुरी वेदान्तवागीश, श्री आनन्द झा ) | उद्बोधनकार्यालय कलिकाता |
| भारतीयदर्शनकोष ( वेदान्त ) | सम्पादकौ- श्री श्रीमोहन भट्टाचार्य तर्कवेदान्ततीर्थ, श्री दीनेश चन्द्र भट्टाचार्य तर्क वेदान्ततीर्थ | कलिकाता संस्कृत महाविद्यालय गवेषणा ग्रन्थमाला |
| मुक्ति एवं ताहार-साधन | श्रीविपिन विहारी घोषालेन सङ्कलितम् | उद्बोधन कार्यालय कलिकाता |
| वेदान्त ओ अद्वैतवाद | श्रीमत्स्वामी विद्यारण्य | वर्धमान विश्वविद्यालय |
| उपगीता | श्री यतीन्द्रमोहन चट्टोपाध्यायेन संकलिता | |
| जाह्नवी ( रजत जयन्ती विशेष संख्या ) | | निखिलवङ्ग संस्कृत सेवि समिति |

A Tri-Lingual Dictionary - Calcutta Sanskrit College Research Series XLVII